"वार्त्ताकी वार्त्तकश्चिव्रस्ततोऽन्या वर्त्तका स्मृता।
वर्त्तकोऽग्निकरः शीतो ज्वरदोषक्षयापहः।
सुरुच्यः शुक्रदो बल्यो वर्त्तकाल्पगुणा ततः॥"
इति भावप्रकाशः॥

वार्त्ता, स्त्री, (वृत्तिरस्या अस्तीति। "प्रज्ञाश्रद्धार्च्चावृत्तिभ्यो णः।" ५। २। १०१। इति णः। ततष्टाप्।) दुर्गा। यथा,—
"पश्वादिपालनाद्देवी कृषिकर्म्मात्मकारणात्।
वर्त्तनाद्धारणाद्वापि वार्त्ता सा एव गीयते॥"
इति देवीपुराणे ४५ अध्यायः॥
वृत्तिः। जनश्रुतिः। इत्यमरः। १। ६। ६॥ उदन्तः। (यथा, मोहमुद्गरे। ८।
"यावद्वित्तोपार्ज्जनशक्त-
स्तावन्निजपरिवारो रक्तः।
तदनु च जरया जर्जरदेहे
वार्त्तां कोऽपि न पृच्छति गेहे॥")
वार्त्तिङ्गणः। कृष्यादि। इति मेदिनी। ते, ५६॥ (यथा, मनौ। ९। ३२६।
"वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम्।
वार्त्तायां नित्ययुक्तः स्यात् पशूनाञ्चैव रक्षणे॥"
वार्त्तेयं चतुर्विधा। यथा, भागवते। १०। २४। २१।
"कृषिवाणिज्यगोरक्षाकुसीदं तुर्य्यमुच्यते।
वार्त्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशम्॥")
वार्त्ताकः, पुं, (वर्त्ततेऽनेनेति। वृत्+"इतेर्द्दिश्च।" उणा० ३। ७९। इति काकुः। "बाहुलकात् उकारस्याकारत्वे वार्त्ताकवार्त्ताकौ।" इत्युज्ज्वलदत्तोक्त्या सिद्धम्।) वार्त्ताकुः। इति त्रिकाण्डशेषः॥ वार्त्तकपक्षी। इति भावप्रकाशः॥
वार्त्ताकी, [न्] पुं, वार्त्ताकुः। इत्यमरटीकायां भरतः॥
वार्त्ताकी, स्त्री, वृहती। इति भावप्रकाशः॥ वार्त्ताकुः। इत्यमरः। २। ४। ११४॥
वार्त्ताकुः, स्त्री, (वर्त्तते इति। वृत्+"इतेर्द्दिश्च।" उणा० ३। ७९। इति काकुः।) स्वनामख्यातफलवृक्षः। वेगुन इति भाषा॥ तत्पर्य्यायः। सिंहुली २ सिंही ३ भण्टाकी ४ दुष्प्रधर्षिणी ५. वार्त्ताकी ६ वार्त्ता ७ वातिङ्गणः ८ वार्त्ताकः ९ शाकबिल्वः १० राजकुष्माण्डः ११। इति जटाधरः॥ वार्त्तिकः १२ वातिगमः १३ वृन्ताकः १४ वङ्गणः १५ अङ्गणः १६। इति शब्दरत्नावली॥ कण्टवृन्ताकी १७ कण्टालुः १८ कण्टपत्रिका १९ निद्रालुः २० मांसफला २१ वृन्ताकी २२ महोटिका २३ चित्रफला २४ कण्टकिनी २५ महती २६ कट्फला २७ मिश्रवर्णफला २८ नीलफला २९ रक्तफला ३० शाकश्रेष्ठा ३१ वृत्तफला ३२ नृपप्रियफला ३३। अस्या गुणाः। कटुत्वम्। रुच्यत्वम्। मधुरत्वम्। पित्तनाशित्वम्। बलपुष्टिकारित्वम्। हृद्यत्वम्। गुरुत्वम्। वातेन निन्दितत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"अग्निप्रदा मारुतनाशिनी च
शुक्रप्रदा शोणितवर्द्धिनी च।
हृल्लासकासारुचिनाशिनी च
वार्त्ताकुरेषा गुणसंप्रयुक्ता॥
सा बाला कफवातघ्नी पक्वा सक्षारपित्तला।
सदाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी॥
अङ्गारपक्वा वार्त्ताकुः किञ्चित्पित्तकरी मता।
कफमेदोऽनिलहरा सरा लघुतरा परा॥"
इति राजवल्लभः॥
अन्यच्च।
"वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम्।
ज्वरवातबलासघ्नं दीपनं शुक्रलं लघु॥
तद्बालं कफपित्तघ्नं वृद्धं पित्तकरं गुरु।
वृन्ताकं पित्तलं किञ्चिदङ्गारोपरिपाचितम्॥
कफमेदोऽनिलामघ्नमत्यर्थं लघु दीपनम्।
तदेव हि गुरु स्निग्धं सतैलं लवणान्वितम्॥
अपरं श्वेतवृन्ताकं कुक्कुटाण्डसमं भवेत्।
तदर्शःसु विशेषेण हितं हीनञ्च पूर्व्वतः॥"
इति भावप्रकाशः॥
वार्त्ताकुः, पुं, (वृत्+काकुः।) वार्त्ताकी। इति त्रिकाण्डशेषः॥
वार्त्तायनः, पुं, (वार्त्तानामयनमनेनेति।) प्रवृत्तिज्ञः। तत्पर्य्यायः। हैरिकः २ गूढपुरुषः ३ प्रणिधिः ४ यथार्हवर्णः ५ अवसर्पः ६ मन्त्रवित् ७ चरः ८ स्पशः ९ चारः १०। इति हेमचन्द्रः। ३। ३९८॥
वार्त्तावहः, पुं, धान्यतण्डुलादेर्वार्त्तां वहति यः। पसारी इति भाषा। तत्पर्य्यायः। वैवधिकः २। इत्यमरभरतौ॥ वार्त्तावहः ३। इति शब्दरत्नावली॥ संवादवाहके, त्रि॥
वार्त्तिकः, पुं, (वृत्तिं वेत्तीति। वृत्ति+उक्थादित्वात् ठक्।) प्रवृत्तिज्ञः। चरः। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे। ३४। ७६।
"दुर्गतो वार्त्तिकजनो लोभात् किं नाम ना चरेत्॥")
(वार्त्ता कृष्यादिस्तत्र साधुः। ठक्।) वैश्यः। (वार्त्ते आरोग्ये साधुरिति। ठक्।) वर्त्तिकपक्षी। इति राजनिर्घण्टः॥ वार्त्ताकी। इति शब्दरत्नावली॥ (वृत्तौ साधुरिति। वृत्ति+"कथादिभ्यष्ठक्।" ४। ४। १०२। इति ठक्। सूत्रवृत्तिनिपुणे, त्रि॥)
वार्त्तिकं, क्ली, (वृत्तिर्ग्रन्थसूत्रविवृतिः। तत्र साधुः। वृत्ति+"कथादिभ्यष्ठक्।" ४।४।१०२। इति ठक्।) उक्तानुक्तदुरुक्तार्थव्यक्तीकारकग्रन्थः। यथा,—
"उक्तानुक्तदुरुक्तार्थचिन्ताकारि तु वार्त्तिकम्॥"
इति हेमचन्द्रः॥
वार्त्तिका, स्त्री, (वार्त्तिक+टाप्।) पक्षिविशेषः। बटेर इति भाषा। तत्पर्य्यायः। विष्णुलिङ्गी २। इति हारावली॥
वार्त्तघ्नः, पुं, (वृत्रघ्न इन्द्रस्यापत्यं पुमान्। वृत्रघ्न+अण्।) अर्ज्जुनः। इति त्रिकाण्डशेषः॥ जयन्तः। वृत्रघ्नसम्बन्धिनि, त्रि॥ (यथा, भागवते। ६। १२। ३४।
"तदा च खे दुन्दुभयो विनेदु-
र्गन्धर्वसिद्धाः समहर्षिसङ्घाः।
वार्त्रघ्नलिङ्गैस्तमभिष्टुवाना
मन्त्रैर्मुदा कुसुमैरभ्यवर्षन्॥")
वार्द्दरं, क्ली, कृष्णलावीजम्। दक्षिणावर्त्तशङ्खः। काकचिञ्चा। भारती। इति मेदिनी। रे, २११॥ कृमिजम्। जलम्। आम्रवीजम्। इति विश्वः॥
वार्द्दलं, क्ली, (वार्भिः सलिलैर्द्दलतीति। दल+अच्। सदा मेघाच्छन्नवृष्टिपातात्तथात्वम्।) दुर्द्दिनम्। इति मेदिनी। ले, ११९॥ तन्मते पवर्गीयादिः॥ (बादल इति भाषा॥)
वार्द्दलः, पुं, (वार्द्दलत्यनेनेति। दल+"पुंसि संज्ञायां घः प्रायेण।" ३। ३। ११८। इति घः।) मेलानन्दा। सा तु मस्याधारः। इति मेदिनी। ले, ११९॥
वार्द्धकं, क्ली, (वृद्धानां समूहः। "गोत्रोक्षोष्ट्रोरभ्रेति।" ४। २। ३९। इत्यत्र "वृद्धाच्चेति।" काशिकोक्तेः वुञ्।) वृद्धसंघातः। (वृद्धस्य भावः कर्म्म वेति। मनोज्ञादित्वात् वुञ्।) वृद्धस्य भावः। वृद्धस्य कर्म्म। इति मेदिनी। के, ५६॥ (यथा, मार्कण्डेयपुराणे। १०९। २४।
"बाल्ये बालक्रिया पूर्व्वं तदन कौमारके च या।
यौवने चापि या योग्या वार्द्धके वनसंश्रया॥"
त्रि, वृद्धः। यथा, नैषधे। १। ७७।
"फलानि पुष्पाणि च पल्लवे करे
वयोऽतिपातोद्गतवातवेपिते।
स्थितैः समादाय महर्षिवार्द्धकाद्
वने तदातिथ्यमशिक्षि शाखिभिः॥"
"महर्षीणां मुनिश्रेष्ठानां मध्ये यो वार्द्धको वृद्धस्तस्मात्। त्रिषु स्याद्वार्द्धको वृद्धे क्लीवं तद्भावसंघयोरिति वलः।" इति तट्टीका॥)
वार्द्धक्यं, क्ली, (वार्द्धकमेव। वार्द्धक+चतुर्वर्णादित्वात् स्वार्थे ष्यञ्।) वृद्धावस्था। तत्पर्य्यायः। वार्द्धकम् २ वृद्धत्वम् ३ स्थाविरम् ४। इति जटाधरः॥ (यथा, महाभारते। ९। ५२। ८।
"आत्मानं मन्यमानापि कृतकृत्यं क्षमान्विता।
वार्द्धक्येन च राजेन्द्र! तपसा चैव कर्षिता॥")
वार्द्धिः, पुं, (वारि जलानि धीयन्तेऽत्रेति। धा+किः।) समुद्रः। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। ८। २०। ३१।
"सोऽनन्तो भगवान् देवोऽनन्तसत्त्वो महाशयः।
अनन्तगुणवार्द्धिश्च आदिदेवो महाद्युतिः॥")
वार्द्धिभवं, क्ली, (वार्द्धौ समुद्रे भवतीति। भू+अच्।) द्रोणीलवणम्। इति राजनिर्घण्टः॥
वार्द्धुषिः, पुं, (वार्द्धुषिकः। पृषोदरादित्वात् कलोपः।) वृद्ध्याजीवः। इत्यमरः। २। ९। ५॥ (यथा, मनौ। ३। १५३।
"प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः।
प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषिस्तथा॥")